# संस्कृत वार्ता:

दिनाङ्क :- 12.04.2026 प्रात: - 06:55

## ईरान –अमरीका वार्ता

पाकिस्तानस्य राजधान्यां इस्लामाबादे अमरीका-इरान-देशयोः मध्ये वार्तालापः प्रचलति, वाईट-हाऊस इत्यनेन दृढीकृतम् यत् वार्तालापः प्रत्यक्षरूपेण प्रचलति। तेन उक्तं यत् एतत् उपवेशनं वाशिङ्गटन-तेहरानयोः मध्ये दशकेषु उच्चतम-स्तरीय-प्रत्यक्ष-संवादस्य निदर्शनम् अस्ति। वाइट हाउस इत्यनेन अग्रे उक्तं यत् इस्लामाबाद्-नगरे अमेरिकादेशस्य विशेषज्ञाणां पूर्णदलं उपस्थितम् अस्ति, अपर-विशेषज्ञाः वाशिङ्गटन्-नगरात् वार्तालापस्य समर्थनं कुर्वन्तः सन्ति। वार्तालापावधौ अमेरिकादेशस्य राष्ट्रपतिः डोनाल्ड ट्रम्पः अवदत् यत् ईरान्-देशेन सह व्यवहारः भवेद् न वा अस्य विषयस्य कापि चिन्ता नास्ति। वार्ताहरैः सह वार्तालापं कुर्वन् राष्ट्रपतिः ट्रम्पः अवदत् यत् होर्मुज़-जलसंधौ कार्याणि प्रचलन्ति एव, अपि च अमेरिका-देशः पूर्वमेव विजितवान् इति दृढीकृतवान्। इरानस्य प्रशासनिक-माध्यमानुसारम् अधुना इस्लामाबाद्-नगरे तृतीयचरणात्मिका निर्णायक-वार्ता प्रचलति। पूर्वद्वयोः चरणयोः अनन्तरं, इदं इरान-देशस्य विवादस्य समाप्त्यर्थं सूचितस्य दश-बिन्दु-प्रस्तावानां विषये सहमतिं प्राप्तुं अन्तिमप्रयासरूपेण दृश्यते। अत्रान्तरे, एकस्मिन् वीडियो-इति दृश्य-श्रव्य-वक्तव्ये इस्राएल-देशस्य प्रधानमन्त्री बेञ्जामिन् नेतन्याहु-वर्यः अवदत् यत् इरान-विरुद्धम् अभियानम् अधुनापि न समाप्तम्, परञ्च इस्राएल-देशः ऐतिहासिकं लाभं प्राप्नोत्, इरान्-देशस्य परमाणु-महत्त्वाकांक्षां च विफलम् अकरोत्।

---

## पश्चिमबंगाल निर्वाचन

पश्चिमबङ्गालराज्ये विधानसभानिर्वाचनाय प्रचारः तीव्रतरं जातम्, यत्र सर्वेषां प्रमुखराजनैतिकदलानां प्रमुखाः नेतारः विभिन्नेषु मण्डलेषु जनसभां सम्बोधयन्ति। प्रधानमन्त्री

तथा भाजपेति दलस्य वरिष्ठः नेता नरेन्द्रमोदी ह्यः कटवा, जङ्गीपुर, कुशमण्डी इत्येतेषु क्षेत्रेषु तिस्रः सभाः अकरोत्। सः राज्ये परिचयस्य अतिक्रमणस्य च विषये भाजपेति दलस्य मतं प्रकटयन् उक्तवान् यत्, तुष्टिकरणस्य राजनीतिं समापयितुं समान-नागरिक-संहितां प्रवर्तयितुं प्रतिज्ञाम् अपि कृतवान्।

प्रधानमन्त्री सिलिगुडी-नगरस्य बिहार-मोड़-तः स्टेशन्-मोड़-पर्यन्तं पथप्रदर्शने अपि भागम् अगृह्णात्। भाजपेति दलस्य वरिष्ठः नेता अमितशाहः अपि पश्चिमबङ्गालराज्यस्य वाङ्कुरा-पुरुलिया-नगरयोः जनसभाम् अभिसंबोधितवान्। सः अवदत् यत्, राज्ये सत्ता ग्रहाणानन्तरं पञ्चचत्वारिंशत् दिवसेषु राज्यसर्वकारस्य कर्मचारिणः सप्तम-वेतन-आयोगस्य लाभाः प्राप्स्यन्ति। तृणमूल्-काङ्ग्रेस्-दलस्य प्रमुखा ममता-बनर्जी इत्येषा बाङ्कुरा, पश्चिम-मिदनापुर, झारग्राम् इत्येतेषु स्थानेषु जनसभाम् अभिसंबोधितवती। सा भाजपेति दलं एन्. आर्. सी. द्वारा, धार्मिक-ध्रुवीकरणेन च बङ्गालस्य विभाजनं कर्तुम् षड्यन्त्रं करोति इति आरोपितवती। पश्चिमवङ्गस्य चतुर्णवत्यधिक द्विशतासनानां कृते विधानसभायाः निर्वाचनं अप्रैल-मासस्य त्रयोविंशति ऊनत्रिंशत् दिनाङ्के च द्वयोः चरणयोः भविष्यति।

---------------------------------------------

## जयशंकर – यु.ए.ई.

विदेशमन्त्री डा. एस्. जयशङ्करः संयुक्त-अरब्-अमीरात्-देशस्य द्विदिवसीय यात्राम् आरब्धवान्, पश्चिम-एशियादेशे वर्तमान-संघर्षस्य तथा क्षेत्रे भारतीय-नागरिकाणां कल्याणस्य चिन्तायाः मध्ये अबुधाबी-नगरे उच्च-स्तरीया-वार्ता कृता। यात्रायाः समये डा. जयशङ्करः यु. ए. ई. उपप्रधानमन्त्रिणा तथा विदेशमन्त्रिणा शेख् अब्दुल्ला बिन् जायद् अल् नहयान् इत्यनेन सह मिलितवान्।

---------------------------------------------

## आई. पी. एल्.

आई. पी. एल्. क्रिकेट्-क्रीडायां गतरात्रौ चेन्नई-नगरे चेन्नई-सूपर-किङ्ग्स् दलेन दिल्ली-कैपिटलस् दलं त्रयोविंशति धावनाङ्कैः पराजितम्। अन्यस्यां स्पर्धायां, ह्यः सायङ्काले न्यू चण्डीगढस्य मुल्लानपुरे, पञ्जाब् किङ्ग्स् दलेन, सनरायजर्स् हैदराबाद दलं षट् स्तोभैः पराजितम्।

अद्य अपराह्ले सार्द्ध त्रिवादने लखनऊ सूपर जायण्ट्स् दलं गुजरात टायटन्स दलेन सह स्पर्धिष्यति, तत्रैव सायं सार्द्ध सप्तवादने मुम्बई इण्डियन्स दलं, रायल् चालेञ्जर्स् बेङ्गलूरु दलं सम्मुखी करिष्यति।

।। <u>इति वार्ता:</u>।।